श्रीदत्तगुरुस्तवः

श्रीदत्तगुरुस्तवः

(दोधकं)
भक्तजनार्ति-विकर्तित-कीर्ति
वेदचतुष्टयपूजितमूर्तिं |
दंड-कमंडलु-मंडित-पिंडमं
दत्तगुरुं प्रणमामि सदाऽहं ||1||

पाटल-वस्त्र-विभूषित-देहं
भस्म-विभूषित-गौर-शरीरं |
भूतिकरं भव-भीति-कुठारं
दत्तगुरुं प्रणमामि सदाऽहं ||2||

सज्जन-पोषण-रक्षण-दक्षं
दुर्जन-शासन-भंजन-मग्नं |
सत्वर-दुस्तर-दुःखहरं तं
दत्तगुरुं प्रणमामि सदाऽहं ||3||

दुःखित-वंदित-पाद-सरोजं
पद्म-सुशोभित-दक्षिण-हस्तं |
योग-निधि नव-नाथ-सनाथं
दत्तगुरुं प्रणमामि सदाऽहं ||4||

भीति-युतो भव-सिंधु-निमग्न-
स्त्वच्चरणं करवाणि शरण्यं |
अत्रिसुतं त्रिगुणादि-विहीनं
दत्तगुरुं प्रणमामि सदाऽहं ||5||

स्नास्यविमुक्तक-तीर्थ-जलौघे
प्रार्थयसेऽन्नकणान् करवीरे |
त्वन्महिमा न हि मानमवैति
त्राहिगुरो प्रणमामि सदाऽहं ||6||

दुःख-हुताशन-तप्तमधीरं
दत्त दयार्णव दीनजनं मां |
तारय पाहि निरंतर-तप्तं
दत्तगुरो प्रणमामि सदाऽहं ||7||

नाभिज-विष्णु-सदाशिव-मूर्ति
दीन-जनावन-तत्पर-वृत्तिं |
विश्व-विषाद-विनाशन-दक्षं
दत्तगुरुं प्रणमामि सदाऽहं ||8||

अष्टकमत्रिसुतस्य सुगेयं
दोधक-वृत्तमिदं रमणीयं |
श्रीगुरुनाम सदा नमनीयं
भक्तजनैः सततं स्मरणीयं ||9||

इति श्री आपटीकरविरचितः श्रीदत्तगुरुस्तवः संपूर्णः |